005147
26-05

॥ श्री सत्यविजयजैनग्रन्थमाला नं ४ ॥

॥ अर्हम् ॥

अनुयोगाचार्यपंन्यासश्रीहर्षविजयगणिपादपद्मेभ्यो नमः

कलिकालसर्वज्ञ श्रीमान् हेमचंद्रसूरीश्वर

निर्मिता ॥

# ॥ अन्ययोगव्यवच्छेद-द्वात्रिंशिका ॥

( स्याद्वादमञ्जर्युद्धृतावचूरिसहिता )

अनुयोगाचार्य पंन्यासश्रीहर्षविजयगणि शिष्य

॥ मुनि मानविजयेन संशोधिता ॥

अमदावादस्थ नागजीभूधराख्यपोलिका निवासी

श्रेष्ठिवर्य लल्लुभाइ दलछाचंद्रस्य विधवा जेकोर-

बाई इत्येतस्या द्रव्यसाहाय्येन ॥

प्रकाशकः

श्री सत्यविजयजैनग्रन्थमालायाः माननीयकार्यवाहक

श्रेष्ठिवर्य बालाभाइ मूलचंद्र—अमदावाद.

प्रत: ४००. अमूल्य. सन् १९२४

आ चोपडी श्रीजैन एडवोकेट प्रीन्टींग प्रेसमां शा. चीमनलाल
गोकलदासे छापी छे, घीकांटा वाडी-अमदावाद,

जगत्पूज्य विशुद्ध चारित्रचूडामणि तपोगच्छालङ्कार भट्टारक श्री १००८

दीक्षा १९४९ अशाड सुद ११,

जन्म सं. १९३० पोस सुद ११,



गणिपद १९६१ मागशर सुद ५,

पन्यासपद १९६२ कारतक वद ११,

## आचार्यश्री विजयनीतिसूरीश्वरजी महाराज

**आचार्यपद** सं १९७६ मार्गशीर्ष शुक्ल ५.

श्रीसत्यविजयजैनग्रन्थमाला नं० ४

॥ अर्हम् ॥

॥ पूज्यपाद आचार्यश्रीविजयनीतिसूरीश्वरपादपद्मेभ्यो नमः ॥

कलिकालसर्वज्ञ श्रीमान् हेमचन्द्रसूरीश्वरविरचिता

# अन्ययोगव्यवच्छेदद्वात्रिंशिका

( स्याद्वादमञ्जर्युद्धृतावचूरीसहिता )

॥ मङ्गलाचरणम् ॥

यस्य ज्ञानमनन्तवस्तुविषयं यः पूज्यते दैवतै-
र्नित्यं यस्य वचो न दुर्नयकृतैः कोलाहलैर्लुप्यते ॥
रागद्वेषमुखद्विषां च परिषत्क्षिप्ता क्षणाद्येन सा
स श्रीवीरप्रभुर्विधूतकलुषां बुद्धिं विधत्तां मम ॥ १ ॥

अनन्तविज्ञानमतीतदोष-
मबाध्यसिद्धान्तममर्त्यपूज्यम् ॥
श्रीवर्द्धमानं जिनमाप्तमुख्यं,
स्वयंभुवं स्तोतुमहं यतिष्ये ॥ २ ॥

व्याख्या—श्रीवर्धमानं जिनमहं स्तोतुं यतिष्ये इति क्रियासंबन्धः। किं विशिष्टं अनन्तमप्रतिपातिविशिष्टं सर्वद्रव्यपर्यायविषयत्वेनोत्कृष्टं ज्ञानं केवलाख्यं विज्ञानं ततोऽनन्तं विज्ञानं यस्य सोऽनन्तविज्ञानस्तम्। तथाऽतीतातिक्रान्ता दोषा रागादयो यस्मात्स तथा तं। तथाऽबाध्यः परैर्बाधितुमशक्यः सिद्धान्तः स्याद्वादश्रुतलक्षणो यस्य तथा तं। तथाऽमर्त्या देवास्तेषामपि पूज्यमाराध्यं। तथाऽऽप्तमुख्यं आप्तिर्हि रागद्वेषमोहानामैकान्तिकः क्षयः। सा येषामस्ति ते आप्ताः। अभ्रादित्वान्मत्वर्थीयोऽप्रत्ययः। तेषां मध्ये मुखमिव सर्वाङ्गानां प्रधानत्वेन मुख्यं। शाखादेर्यः। पुनः स्वयमात्मनैव परोपदेशनिरपेक्षतयाऽवगततत्त्वो भवतीति स्वयंभूः स्वयंसंबुद्धः। एवंविधं चरमजिनेन्द्रं स्तोतुं स्तुतिविषयीकर्तुं अहं यतिष्ये यत्नं करिष्यामि॥ १॥

अथ स्तुतिकारस्त्रिजगद्गुरोर्निःशेषगुणस्तुतिश्रद्धालुरपि सद्भूतवस्तुवादित्वाख्यं गुणविशेषमेव वर्णयितुमात्मनोऽभिप्रायमाविष्कुर्वन्नाह—

अयं जनो नाथ तव स्तवाय,
गुणान्तरेभ्यः स्पृहयालुरेव॥

विगाहतां किन्तु यथार्थवाद-

मेकं परीक्षाविधिदुर्विदग्धः ॥२॥

व्याख्या—अयमिति, हे नाथ अयं मल्लक्षणो जनस्तव गुणान्तरेभ्यो यथार्थवादव्यतिरिक्तेभ्योऽनन्यसाधारणशारीरलक्षणादिभ्यः स्पृहयालुरेव । किमर्थं स्तवाय स्तुतिकरणायेति । तादर्थ्ये चतुर्थी । किन्त्वित्यभ्युपगमविशेषद्योतने निपातः । एकमेकमेव यथार्थवादं यथावस्थितवस्तुतत्त्वप्रख्यापनाख्यं त्वदीयं गुणमयं जनो विगाहताम् । स्तुतिक्रियया समन्ताद् व्याप्नोतु यतोऽयं जनः परीक्षाविधिदुर्विदग्धः पण्डितं मन्ये इति यावत् ॥ २ ॥

अथ ये कुतीर्थ्याः कुशास्त्रवासनावासितस्वान्ततया त्रिभुवनस्वामिनं स्वामित्वेनाप्रतिपन्नास्तानपि तत्त्वविचारणां प्रति शिक्षयन्नाह—

गुणेष्वसूयां दधतः परेऽमी,

माशिश्रियन्नाम भवन्तमीशम् ॥

तथाऽपि सम्मील्य विलोचनानि,

विचारयन्तां नयवर्त्म सत्यम् ॥३॥

व्याख्या—गुणेष्विति, अमी इति । अदसस्तु विप्रकृष्टे इति वचनात् तत्त्वातत्त्वविमर्शबाह्यतया दू-

रीकरणार्हत्वाद्विप्रकृष्टाः । परे कुतीर्थ्या भवन्तं त्वामीशं माशिश्रियन् स्वामित्वेन मा प्रतिपद्यन्तां । यतो गुणेष्वसूयां दधतो गुणेषु बद्धमत्सराः । गुणेषु दोषाविष्करणं ह्यसूया । यो हि यत्र मत्सरीभवति स तदाश्रयं नानुरुध्यते न आद्रियते । यथा माधुर्यमत्सरीकरभः पुण्ड्रेक्षुकाण्डं गुणाश्रयश्च भवान् । तथापि त्वदाज्ञाप्रतिपत्तेरभावेऽपि लोचनानि नेत्राणि संमील्य मीलितपुटीकृत्य सत्यं युक्तियुक्तं नयवर्त्म न्यायमार्गं विचारयन्तां विमर्शविषयीकुर्वन्तु ॥ ३ ॥

अथ यथावन्नयवर्त्मविचारमेव प्रपचयितुं पराभिप्रेततत्त्वानां प्रामाण्यं निराकुर्वन्नादितस्तावत्काव्यषट्केनोलुक्यमताभिमततत्त्वानि दूषयितुकामास्तदन्तर्वैशेषिकपातिनौ प्रथमतरं सामान्यविशेषौ दूषयन्नाह—

स्वतोऽनुवृत्ति व्यतिवृत्तिभाजो
भावा न भावान्तरनेयरूपाः ॥
परात्मतत्त्वादतथात्मतत्त्वाद्,
द्वयं वदन्तो कुशलास्स्खलन्ति ॥ ४ ॥

व्याख्या—स्वत इति,, अभवन् भवन्ति भविष्यन्ति चेति भावाः पदार्थाः आत्मपुद्गलादयस्ते स्वत इति । सर्वं हि वाक्यं सावधारणमामनन्तीति स्व-

त एवात्मीयस्वरूपादेवानुवृत्ति व्यावृत्तिभाजः । ए-काकारा प्रतीतिरेकशब्दवाच्यता चानुवृत्तिः, व्यति-वृत्तिर्व्यावृत्तिर्विजातीयेभ्यः सर्वथा व्यवच्छेदस्ते उभे अपि संवलिते भजन्ते आश्रयन्तीति अनुवृत्तिव्यावृ-त्तिभाजः सामान्यविशेषोभयात्मका इत्यर्थः। अस्यै-वार्थस्य व्यतिरेकमाह । न भावान्तरनेयरूपा इति । नेति निषेधे । भावान्तराभ्यां पराभिमताभ्यां द्रव्यगुण-कर्मसमवायेभ्यः पदार्थान्तराभ्यां भावव्यतिरिक्तसा-मान्यविशेषाभ्यां नेयं प्रतीतिविषयं प्रापणीयं रूपं यथा-संख्यमनुवृत्तिव्यावृत्तिलक्षणं स्वरूपं येषां ते तथोक्ताः स्वभावो ह्ययं सर्वभावानां यदनुवृत्तिव्यावृत्तिप्र-त्ययौ स्वत एव जनयन्ति । तथा हि–घट एव तावत् पृथुबुध्नोदराद्याकारवान् प्रतीतिविषयीभवन् सन् अ-न्यानपि तदाकृतिभृतः पदार्थान् घटरूपतया घटैक-शब्दवाच्यतया सजातीयेभ्यश्च प्रत्यायन् सामा-न्याख्यां लभते । स एव चेतरेभ्यः सजातीयविजा-तीयेभ्यो द्रव्यक्षेत्रकालभावैरात्मानं व्यावर्त्तयन्विशे-षव्यपदेशमश्नुते इति । तदेवं सामान्यविशेषयोः स्वतत्त्वं यथावदनवबुद्धयमाना अकुशला अतत्त्वा-भिनिविष्टदृष्टयस्तीर्थान्तरीयाः स्खलन्ति न्यायमार्गा-द् भ्रश्यन्ति निरुत्तरीभवन्ति इत्यर्थः । किं कुर्वाणाः द्वयमनुवृत्तिव्यावृत्तिलक्षणं प्रत्ययद्वयं वदन्तः । कस्मा-

देतत्प्रत्ययद्वयं वदन्त इत्याह—परात्मतत्त्वात् परौ पदार्थेभ्यो व्यतिरिक्तत्वादन्यौ परस्परनिरपेक्षौ यौ सामान्यविशेषौ तयोर्यदात्मतत्त्वं स्वरूपमनुवृत्तिव्यावृत्तिलक्षणं तस्मात्तदाश्रित्येत्यर्थः । 'गम्ययपः कर्माधारे' इत्यनेन पंचमी । कथंभूतात्परात्मतत्त्वात् । अतथात्मतत्त्वात् । यथा येनैकान्तभेदलक्षणेन प्रकारेण परैः कल्पितं न तथा तेन प्रकारेणात्मतत्त्वं स्वरूपं यस्य तत्तथा तस्मात् ॥ ४ ॥

अथ तदभिमतावेकान्तनित्यानित्यपक्षौ दूषयन्नाह—

आदीपमाव्योमसमस्वभावं
स्याद्वादमुद्रानतिभेदि वस्तु ॥
तन्नित्यमेवैकमनित्यमन्य-
दिति त्वदाज्ञाद्विषतां प्रलापाः ॥५॥

व्याख्या--आदीपमिति,, दीपादारभ्य आव्योम मर्यादीकृत्य सर्वं वस्तु पदार्थस्वरूपं समस्वभावं समस्तुल्यः स्वभावः स्वरूपं यस्य तत्तथा । किंच वस्तुनः स्वरूपं द्रव्यपर्यायात्मकत्वमिति ब्रूमः । समस्वभावत्वं कुत इति विशेषणद्वारेण हेतुमाह । स्याद्वादमुद्राऽनतिभेदि स्यादित्यव्ययमनेकान्तद्योतकम् । ततः स्या-

द्वादोऽनेकान्तवादो नित्यानित्याद्यनेकधर्मशबलैक-
वस्त्वभ्युपगम इति यावत् । तस्य मुद्रा मर्यादा तां
नाऽतिभिनत्ति नातिक्रामतीति स्याद्वादमुद्रानतिभेदि।
यथा हि- न्यायैकनिष्ठे राजनि राज्यश्रियं शा-
सति सति सर्वाः प्रजास्तन्मुद्रां नातिवर्त्तितुमीशते।
तदतिक्रमे तासां सर्वार्थहानिभावात्। एवं विज-
यिनि निष्कण्टके स्याद्वादमहानरेन्द्रे तदीयमुद्रां सर्वेऽ-
पि पदार्था नातिक्रामन्ति। तदुल्लंघने तेषां स्वरूपव्य-
वस्थाहानिप्रसक्तेः । सर्ववस्तुनां समस्वभावत्वकथ-
नं च पराभिष्टस्यैकं वस्तु व्योमादिनित्यमेवान्यच्च प्र-
दीपाद्यनित्यमेवेति, वादस्य प्रतिक्षेपबीजं। सर्वे हि
भावा द्रव्यार्थिकनयापेक्षया नित्याः, पर्यायार्थिकन-
यादेशात्पुनरनित्याः। एवं चोत्पादव्ययध्रौव्यात्मकत्वे
सर्वभावानां सिद्धेऽपि तद्वस्तु एकं आकाशात्मादिकं
नित्यमेव, अन्यच्च प्रदीपघटादिकमनित्यमेवेत्येवका-
रोऽत्रापि सम्बध्यते।इत्थं हि दुर्नयवादापत्तिः । अ-
नंतधर्मात्मके वस्तुनि स्वाभिप्रेतनित्यत्वादिधर्मसम-
र्थनप्रवणाः। शेषधर्मतिरस्कारेण प्रवर्तमाना दुर्नया
इति तल्लक्षणात् इत्यनेनोल्लेखेन त्वदाज्ञाद्विषतां भ-
वत्प्रणीतशासनविरोधिनां प्रलापा प्रलपितान्यस-
म्बद्धवाक्यानीति यावत्॥ ५॥

अथ तदभिमतमीश्वरस्य जगत्कर्तृत्वाभ्युपगमं मिथ्याभिनिवेशरूपं निरूपयन्नाह -

कर्त्ताऽस्ति कश्चिज्जगतः स चैकः,
स सर्वगः स स्ववशः स नित्यः ॥
इमाः कुहेवाकविडम्बनाः स्यु-
स्तेषां न येषामनुशासकस्त्वम् ॥६॥

व्याख्या- कर्त्तेति,, जगतः प्रत्यक्षादिप्रमाणोपलक्ष्यमाणचराचररूपस्य विश्वत्रयस्य कश्चिदनिर्वचनीयस्वरूपः पुरुषविशेषः कर्त्ता स्रष्टाऽस्ति विद्यते । तेषां प्रमाणानि उर्वीपर्वततर्वादिकं सर्वं बुद्धिमत्कर्तृकं कार्यत्वात् । यद्यत्कार्यं तत्तत्सर्वं बुद्धिमत्कर्तृकं यथा घटस्तथा चेदं तस्माद् व्यतिरेके व्योमादि ।यश्च बुद्धिमांस्तत्कर्त्ता स भगवानीश्वर एवेति । स चैकः च पुनरर्थे । स पुनः पुरुषविशेष एकोऽद्वितीयः । बहूनां हि विश्वविधातृत्वस्वीकारे परस्परविमतिसंभावनाया अनिवार्यत्वादेकैकस्य वस्तुनोऽन्यान्यरूपतया निर्माणे सर्वमसमंजसमापद्यतेति । तथासर्वगः सर्वत्र गच्छतीति सर्वगः सर्वव्यापी । तस्य हि प्रतिनियतदेशवर्त्तित्वेऽनियतदेशवृत्तीनां विश्वत्रयान्तर्वर्त्तिपदार्थानां यथावन्निर्माणानुपपत्तिः । कुम्भकारादिषु तथा दर्शनात् ।

अथवा सर्वं गच्छति जानातीति सर्वगः सर्वज्ञः । सर्वे ग-
त्यर्थाः ज्ञानार्था इति वचनात् । सर्वज्ञत्वाभावे हि यथो-
चितोपादानकारणाद्यनभिज्ञत्वादनुरूपकार्योत्पत्तिर्न स्या
त् । तथा स स्ववशः स्वतन्त्रः । सकलप्राणिनां स्वेच्छ-
या सुखदुःखयोरनुभावनसमर्थत्वात् । पारतन्त्र्ये तु
तस्य परमुखप्रेक्षितया मुख्यकर्तृत्वव्याघातादनीश्व
रत्वापत्तिः । तथा स नित्यः । अप्रच्युतानुत्पन्नस्थि-
रैकरूपः । तस्य ह्यनित्यत्वे परोत्पाद्यतया कृतकत्वप्रा-
प्तिः । अपेक्षितपरव्यापारो हि भावः स्वभावनिष्पत्तौ
कृतक इत्युच्यते । यश्चापरस्तत्कर्त्ता कल्प्यते स नित्यो
ऽनित्यो वा स्यात् नित्यश्चेदधिकृतेश्वरेण किमपराद्धं ।
अनित्यश्चेत्तस्याप्युत्पादकान्तरेण भाव्यं । तस्यापि नि-
त्यानित्यकल्पनायां अनवस्थादौस्थ्यमिति । तदेवमेक-
त्वादिविशेषणविशिष्टो भगवानीश्वरस्त्रिजगत्कर्त्तेति
पराभ्युपगममुपदर्श्योत्तरार्द्धेन तस्य दुष्टत्वमाचष्टे ।
इमाः एता अनन्तरोक्ताः कुहेवाकविडम्बनाः कुत्सि-
ताहेवाका आग्रहविशेषा कुहेवाकाः कदाग्रहा इत्य-
र्थः । ता एव विडम्बना विचारचातुरीबाह्यत्वेन ति-
रस्काररूपत्वाद्विगोपकप्रकाराः स्युर्भवेयुस्तेषां प्रामाणि-
कापसदानां येषां हे स्वामिन् त्वं नानुशासको न शि-
क्षादाता । अयमाशयः यद्यपि भगवानविशेषेण स-

कलजगज्जन्तुजातहिताबहां सर्वेभ्य एव देशनावाच-
माचष्टे । तथापि सैव केषांचिन्निचितनिकाचितपाप-
कर्मकल्मषितात्मनां रुचिरूपतया न परिणमते । अ-
पुनर्बंधकादिव्यतिरिक्तत्वेनायोग्यत्वात् । अतो वस्तु
वृत्त्या न तेषां भगवाननुशासक इति । यत्तावदुक्तं
परैः क्षित्यादयो बुद्धिमत्कर्तृकाः कार्यत्वात घटवदिति
तदयुक्तं।व्याप्तेरग्रहणात्।स चायं जगन्ति सृजन् सश-
रीरोऽशरीरो वा स्यात् । सशरीरोऽपि किमस्मदादिव-
दृदृश्यशरीरविशिष्ट उत पिशाचादिवददृश्यशरीरवि-
शिष्टः । प्रथमपक्षे प्रत्यक्षबाधः । तं विनापि जायमाने
शक्रधनुरभ्रादौ कार्यत्वस्य दर्शनात् । द्वितीयपक्षे त-
स्य माहात्म्यविशेषः कारणमाहोश्विदस्मदाद्यदृष्टवैगुण्यं ।
माहात्म्यविशेषे तस्यादृश्यशरीरत्वं प्रत्येतव्यं । त-
त्सिद्धौ माहात्म्यविशेषसिद्धिः । अशरीरश्चेत्तदा
दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यं । घटादयो हि कार्य-
रूपाः सशरीरकर्तृका दृष्टाः । अशरीरस्य
च सतस्तस्य कार्यप्रवृत्तौ कुतः सामर्थ्यं आ-
काशादिवत् । तस्मात् सशरीराशरीरलक्षणे पक्षद्वये-
ऽपि कार्यहेतोर्व्याप्त्यसिद्धिः । तस्मान्न कश्चिज्जगत्क-
र्त्ता । एकत्वादीनि तु जगत्कर्तृत्वव्यवस्थापनायानी-
यमानानि तद्विशेषणानि षण्ढं प्रति कामिन्या रूपसंप-

न्निरूपणप्रायाण्येव तथा सर्वगतत्वमपि तस्य नोपपन्नं। तद्धि सर्वगः शरीरात्मना ज्ञानात्मना वा स्यात्। प्रथमपक्षे तदीयेनैव देहेन जगत्त्रयस्य व्याप्तत्वादितरनिर्मेयपदार्थानामाश्रयानवकाशः द्वितीयपक्षे तु सिद्धसाध्यता। सर्वज्ञपक्षेऽपि दोषः तस्य सार्वज्ञ्यं प्रत्यक्षेण परोक्षेण वा। न तावत्प्रत्यक्षेण। तस्येन्द्रियार्थसन्निकर्षोत्पन्नतया अतीन्द्रियार्थग्रहणासामर्थ्यात्। नापि परोक्षेण। तद्धि अनुमानं शाब्दं वा न तावदनुमानं। तस्य लिंगग्रहणलिंगिलिंगसंबन्धस्मरणपूर्वकत्वात्। तन्नायं सर्वज्ञः। तथा न तस्य स्ववशत्वं स हि यदि स्वाधीनः सन् विश्वं विधत्ते परमकारुणिकश्च त्वया वर्ण्यते। तत्कथं सुखितदुःखिताद्यवस्थाभेदवृन्दस्थपुटितं घटयति। अतो न स्ववशः। नित्यत्वमपि तस्य नास्ति। स खलु नित्यत्वेनैकरूपः सन् त्रिभुवनसर्गस्वभावो अतत्स्वभावो वा प्रथमविधायां जगन्निर्माणात्कदाचिदपि नोपरमेत। तदुपरमे तत्स्वभावत्वहानिः। अतत्स्वभावपक्षे न जातु जगन्ति सृजेत् तत्स्वभावायोगात् गगनवत्। अतो नास्य जगत्कर्तृत्वं कथमपि न सिध्यति इति दिक्॥ ६॥

अथ चैतन्यादयो रूपादयश्च धर्म्मा आत्मादेर्घटादेश्च धर्मिणोऽत्यन्तं व्यतिरिक्तापि समवायसंबन्धेन सम्बद्धाः सन्तो धर्मधर्मिव्यपदेशमश्नुवते इति तन्मतं दूषयन्नाह—

न धर्मधर्मित्वमतीव भेदे,
वृत्त्याऽस्ति चेन्न त्रितयं चकास्ति ॥
इहेदमित्यस्ति मतिश्च वृत्तौ ,
न गौणभेदोऽपि च लोकबाधः ॥ ७ ॥

व्याख्या—नेति,, धर्मधर्मिणोरतीव भेदे अतीवेत्यत्रेवशब्दो वाक्यालङ्कारे । तं च प्रायोऽतिशब्दात् किंवृत्तेश्च प्रयुञ्जते शाब्दिकाः । ततश्च धर्मधर्मिणोरतिभेदे एकान्तभिन्नत्वे अङ्गीक्रियमाणे धर्मधर्मित्वं न स्यात् । अस्य धर्मिणः इमे धर्माः एषां च धर्माणामयमाश्रयभूतो धर्मीत्येवं सर्वप्रसिद्धो धर्मधर्मिव्यपदेशो न प्राप्नोति । एवमुक्ते सति परः प्रत्यवतिष्ठते । वृत्त्यास्तीति । अयुतसिद्धानामाधार्याधारभूतानामिहप्रत्ययहेतुः सम्बन्धः समवायः । स च समवयनात्समवाय इति, द्रव्यगुणकर्मसामान्यविशेषेषु पंचसु पदार्थेषु वर्त्तनात् वृत्तिः । तया वृत्त्या समवायसम्बन्धेन तयोर्धर्मधर्मिणोरितरेतरविनिर्लुठितत्वेऽपि, धर्मधर्मिव्यपदेश इष्यते इति नानन्तरोक्तो दोष इति । अत्राचार्यः समाधत्ते । चेदिति यद्येवं तव मतिः सा प्रत्यक्षप्रतिक्षिप्ता । यतो न त्रितयं चकास्ति । अयं धर्मी, इमेऽस्य धर्मा, अयं चैतत्सम्बन्धनिबन्धनं समवा

थ इत्येतत्त्रितयं न चकास्ति ज्ञानविषयतया न प्रतिभासते। पुनराह–इहेदमित्यस्ति मतिश्च वृत्ताविति–इहेदमिति इहेदमिति आश्रयाश्रयिभावहेतुक इहप्रत्ययो वृत्तावप्यस्ति समवायसम्बन्धेऽपि विद्यते। च शब्दोऽपि शब्दार्थः तस्य च व्यवहितसम्बन्धस्तथैव व्याख्यातं न गौण इति। योऽयं भेदः स नास्ति गौणलक्षणाभावात्। तल्लक्षणं तु –

'अव्यभिचारी मुख्योऽविकलोऽसाधारणो अन्तरंगश्च।
विपरीतो गौणोऽर्थः सति मुख्ये धीः कथं गौणे ॥१॥

इति तस्माद्धर्मधर्मिणोः सम्बन्धने मुख्यः समवायः। अपि च लोकबाध इति। अपि चेति दूषणाभ्युच्चये। लोकः प्रामाणिकलोकः सामान्यलोकश्च तेन बाधो विरोधो लोकबाधस्तदप्रतीतव्यवहारसाधनात्॥

अथ सत्ताभिधानं पदार्थान्तरमात्मनश्च व्यतिरिक्तं ज्ञानाख्यं गुणं आत्मविशेषगुणोच्छेदस्वरूपां च मुक्तिमज्ञानादङ्गीकृतवतः परानुपहसन्नाह—

सतामपि स्यात्क्वचिदेव सत्ता,
चैतन्यमौपाधिकमात्मनोऽन्यत् ॥
न संविदानन्दमयी च मुक्तिः,
सुसूत्रमासूत्रितमत्वदीयैः ॥८॥

व्याख्या–सतामिति, सतामपि सद्बुद्धिवेद्यतया साधारणानामपि षण्णां पदार्थानां मध्ये क्वचिदेव केषुचिदेव पदार्थेषु सत्ता सामान्ययोगः स्याद् भवेन्न सर्वेषु। तथा चैतन्यं ज्ञानमात्मनः क्षेत्रज्ञादन्यदत्यन्त-व्यतिरिक्तं। असमासकरणादत्यन्तमिति लभ्यते। औपाधिकं। उपाधेरागतमौपाधिकं। तथा मुक्तिर्मोक्षः न संविदानन्दमयी न ज्ञानसुखरूपा। संवित् ज्ञानं आनन्दः सौख्यं ततो द्वन्द्वः संविदानन्दौ प्रकृतौ यस्यां सा संविदानन्दमयी। तादृशो न भवति। च शब्दः पूर्वोक्ताभ्युपगमद्वयसमुच्चये। तदेतदभ्युपगमत्रयमित्थं समर्थयद्भिरत्वदीयैः त्वदाज्ञाबहिर्भूतैः कणादमतानुगामिभिः सुसूत्रमासूत्रितं सम्यगागमः प्रपञ्चितः। अथवा सुसूत्रमिति क्रियाविशेषणं। शोभनं सूत्रं वस्तुव्यवस्था घटना विज्ञानं यत्रैवमासूत्रितं तत्तच्छास्त्रार्थोपनिबन्धः कृत इति हृदयम्॥ ८ ॥

अथ ते वादिनः कायप्रमाणत्वमात्मनः स्वयं संवेद्यमानमप्यपलप्य तादृशकुशास्त्रशस्त्रसम्पर्कविनष्टसद्दृष्टयस्तस्य विभुत्वं मन्यन्ते अतस्तत्रोपलम्भमाह—

यत्रैव यो दृष्टगुणः स तत्र,<br>
कुम्भादिवन्निष्प्रतिपक्षमेतत्॥

तथापि देहाद्बहिरात्मतत्त्व-
मतत्त्ववादोपहताः पठन्ति ॥ ९ ॥

व्याख्या-यत्रेति, यत्रैव देशे यः पदार्थो दृष्टगुणो द्रष्टा प्रत्यक्षादिप्रमाणतोऽनुभूता गुणा धर्मा यस्य स तथा स पदार्थस्तत्रैव विवक्षितदेशे एवोपपद्यत इति क्रियाध्याहारो गम्यः। पूर्वस्यैवकारस्यावधारणार्थस्यात्राप्यभि सम्बन्धात्तत्रैव नान्यत्रेत्यन्ययोगव्यवच्छेदः, । अमुमेवार्थं दृष्टान्तेन द्रढयति । कुम्भादिवत् घटादिवत् । यथा कुम्भादेर्यत्रैव देशे रूपादयो गुणा उपलभ्यन्ते तत्रैव तस्यास्तित्वं प्रतीयते नान्यत्र । एवमात्मनोऽपि गुणाश्चैतन्यादयो देह एव दृश्यन्ते न बहिः । तस्मात्. तत्प्रमाण एवायम् इति । यद्यपि पुष्पादीनामवस्थानदेशादन्यत्रापि गंधादिगुणोपलभ्यते, तथापि तेन न व्यभिचारः । तदाश्रयाहि गन्धादिपुद्गलास्तेषां च वैश्रसिक्या प्रायोगिक्या च गत्यागतिमत्त्वेन तदुपलम्भकघ्राणादिदेशं यावदागमनोपपत्तेरिति । अत एवाह-एतन्निष्प्रतिपक्षं बाधकरहितं । ननु मन्त्रादीनां भिन्नदेशस्थानामप्याकर्षणोच्चाटनादिको गुणो योजनशतादेः परतोऽपि दृश्यते इत्यस्ति बाधकमिति चेत् । मैवं । स हि न खलु मन्त्रादीनां गुणः किन्तु तदधिष्ठातृदेवतानां । तासां चाकर्षणीयोच्चाटनीयादिदे-

शगमने कौतस्कुतोऽयमुपालंभः । न जातु गुणा गुणिनमतिरिच्यते इति । अथोत्तरार्द्धं व्याख्यायते । तथापीति,, तथापि एवं निःसपत्नव्यवस्थितेऽपि तत्त्वेऽतत्त्ववादोपहताः ( अनाचारः इत्यत्रैव नञः कुत्सात्वात् कुत्सिततत्त्ववादेन तदभिमताप्ताभासपुरुषविशेषप्रणीतेन तत्त्वाभासप्ररूपणेनोपहता व्यामोहिताः देहाद् बहिः शरीरव्यतिरिक्तेऽपि देशे आत्मतत्त्वमात्मरूपं पठन्ति । शास्त्ररूपतया प्रणयन्ते इत्यर्थः । भावार्थस्त्वयं । आत्मा सर्वगतो न भवति । सर्वत्र तद्गुणानुपलब्धेः । यो यः सर्वत्रानुपलभ्यमानगुणः स स सर्वगतो न भवति। यथा घटस्तथा चायं तस्मात्तथा । व्यतिरेके व्योमादि न चायमसिद्धो हेतुः । कायव्यतिरिक्तदेशे तद्गुणानां बुद्ध्यादीनां वादिना वा प्रतिवादिना अनभ्युपगमात् । तथा च भट्टः श्रीधरः " सर्वगतत्वेऽप्यात्मनो देहप्रदेशे ज्ञातृत्वं । नान्यत्र शरीरस्योपभोगायतनत्वात् । अन्यथा तस्य वैयर्थ्यादिति ॥ ९ ॥

सांप्रतमक्षपादप्रतिपादितपदार्थानां सर्वेषां चतुर्थपुरुषार्थे प्रत्यसाधकतमत्वे वाच्येपपि तदन्तःपातिनां छलजातिनिग्रहस्थानानां परोपन्यासनिरासमात्रफलतया अत्यन्तमनुपादेयत्वात्तदुपदेशदातुर्वैराग्यमुपहसन्नाह—

स्वयं विवादग्रहिले वितण्डा-
पाण्डित्यकण्डुलमुखे जनेऽस्मिन्॥
मायोपदेशात्परमर्म भिन्द-
न्नहो विरक्तो मुनिरन्यदीयः ॥ १०॥

व्याख्या—स्वयमिति,, अन्यदीयो मुनिरक्षपाद ऋषिः अहो विरक्तोऽहो वैराग्यवान् ( अहो इत्युपसर्गमाश्चर्यं सूचयति ) ( अन्यदीय इत्यत्र ईयकारके इति दोन्तः ) किंकुर्वन्नाह-परमर्मभिन्दन्, ( जातावेकवचनप्रयोगात् )परमर्माणि व्यथयन्, कस्मात् मायोपदेशाद्धेतोः। मायापरवंचनं तस्या उपदेशः छलजातिनिग्रहस्थानलक्षणपदार्थत्रयप्ररूपणद्वारेण शिष्येभ्यः प्रतिपादनं तस्मात् ( गुणादस्त्रियां नवेत्यनेन हेतौ तृतीया प्रसंगे पंचमी, ) कस्मिन् विषये मायां अयमुपदिष्टवानित्याह। अस्मिन्प्रत्यक्षोपलक्ष्यमाणे जने तत्त्वातत्त्वविमर्शबहिर्मुखतया प्राकृतप्राये लोके। कथंभूते, स्वयमात्मना विवादेन ग्रहिले ग्रहग्रहित इव तस्मिन्। विवादलक्षणं हरिभद्रसूरिराह - लब्धिख्यात्यर्थिना तु स्यादुःस्थितेनामहात्मना। छलजातिप्रधानो यः स विवाद इति स्मृतः ॥ १ ॥ तथा वितण्डा प्रतिपक्षस्थापनाहीनं वाक्यं। वितण्ड्यते आहन्यते अनया प्रति-

पक्षसाधनमिति व्युत्पत्तेः। वस्तुतस्तु अपरामृष्टतत्त्वातत्त्वविचारं मौर्ख्यं वितण्डा। तत्र यत्पाण्डित्यं निपुणता तया कण्डूलमिव कण्डूलं मुखं यस्य स तस्मिन्॥१०॥

अधुना मीमांसकभेदाभिमतं वेदविहितहिंसायो धर्महेतुत्वमुपपत्तिपुरःसरं निराकुर्वन्नाह—

न धर्महेतुर्विहितापि हिंसा,
नोत्सृष्टमन्यार्थमपोद्यते च॥
स्वपुत्रघातान्नृपतित्वलिप्सा,
स ब्रह्मचारि स्फुरितं परेषाम्॥११॥

व्याख्या—नेति विहितापि वेदप्रतिपादितापि हिंसा प्राणिप्राणव्यप(रोपण)रूपा न धर्महेतुः न धर्मानुबन्धनिबन्धनं। अत्र स्ववाक्यविरोधः। हिंसा चेत् धर्महेतुः कथं, धर्महेतुश्चेत् हिंसा कथमिति। नोत्सृष्टमित्यन्यार्थमिति मध्यवर्तिपदं डमरुकमणिन्यायेनोभयत्रापि सम्बन्धनीयम अन्यार्थमुत्सृष्टम् अन्यस्मै कार्याय प्रयुक्तं। उत्सर्गवाक्यमन्यार्थप्रयुक्तेन वाक्येन नापोद्यते नापवादगोचरीक्रियते। यमेवार्थमाश्रित्य शास्त्रेषूत्सर्गः प्रवर्त्तते तमेवार्थमाश्रित्यापवादोऽपि प्रवर्त्तते। तयोर्निम्नोन्नतादिव्यवहारवत्परस्परसापेक्षत्वेनैकार्थसाधनविषयत्वात्। स्वपुत्रघातात् निजसुतनिपा-

तनेन नृपतित्वलिप्सा राज्यप्राप्तिमनोरथसदृशी । यथा कश्चिद्विपश्चित् पुरुषः परुषाशयतया निजमंगजं व्यापाद्य राज्यश्रियं प्राप्तुमीहते । न तस्य तत्प्राप्तावपि पुत्रघातपातककलंकः क्वचिदपयाति । एवं वेदविहित-हिंसया देवतादिप्रीतिसिद्धावपि हिंसासमुत्थं पापं न-पराहन्यते ॥ ११ ॥

साम्प्रतं नित्यपरोक्षज्ञानवादिनां मीमांसकभेदभट्टाना-मेकात्मसमवायिज्ञानान्तरवेद्यज्ञानवादिनां च यौगानमतं विकुट्टयन्नाह—

स्वार्थावबोधक्षम एव बोधः,
प्रकाशते नार्थकथाऽन्यथा तु ॥
परे परेभ्यो भयतस्तथापि,
प्रपेदिरेऽज्ञानमनात्मनिष्ठम् ॥ १२ ॥

व्याख्या—स्वार्थेति,, बोधो ज्ञानं स च स्वार्थाव-बोधक्षम एव समर्थ एव प्रतिभासते । विपर्यये दूषण-माह-नार्थकथाऽन्यथा तु । ( तु शब्दोऽवधारणे भिन्नक्र-मश्च सचार्थकथया सह योजित एव ) । अन्यथा अर्थ प्रकाशने ज्ञानस्य स्वसंविदितत्वानभ्युपगमेऽर्थकथैव न-स्यात् । अर्थकथा पदार्थसम्बन्धिनी वार्त्ता सदसद्रू-पात्मकं स्वरूपमिति यावत् । तथापि ज्ञानस्य स्वविदि-

तत्वे युक्त्या घटमानेऽपि परे तीर्थान्तरीयाः ज्ञानं कर्मतापन्नमनात्मनिष्ठं न विद्यते आत्मनः स्वस्य निष्ठा-निश्चयो यस्य तदनात्मनिष्ठं अस्वसंविदितमित्यर्थः प्रपेदिरे प्रपन्नाः । कुत इत्याह--परेभ्यो भयतः । पूर्वपक्षवादिभ्यः सकाशात् ज्ञानस्य स्वसंविदितत्वं नोपपद्यते स्वात्मनि क्रियाविरोधादित्युपालम्भसम्भावनासम्भवं यद्भयं तस्मात्तदाश्रित्येत्यर्थः ॥ १२ ॥

अथ ये ब्रह्माद्वैतवादिनोऽपरपर्यायमायावशात्प्रतिभासमानत्वेन विश्वत्रयवर्तिवस्तुप्रपञ्चमपारमार्थिकं समर्थयन्ते । तन्मतमुपहसन्नाह-

माया सती चेद्द्वयतत्त्वसिद्धि-
रथासती हन्त कुतः प्रपञ्चः ॥
मायैव चेदर्थसहा च तत्किं,
माता च वन्ध्या च भवत्परेषाम् ॥ १३ ॥

व्याख्या—मायेति,, तै र्वादिभि र्माया अविद्या प्रपंचहेतुः कल्पिता सा सद्रूपाऽसद्रूपा वा । सती सद्रूपाचे त्तदा द्वयतत्त्वसिद्धिः द्वौ अवयवौ यस्य तद्वयं तथाविधं यत्तत्त्वं परमार्थ स्तस्यसिद्धिः । एवं सति एकं ब्रह्म द्वितीया माया । तदा अद्वैतवादस्य मूले कुठारो निहितः । अथेति पक्षान्तरे । यदि असतीखपु-

ऽपवदवस्तुरूपा, तर्हि अयं प्रपञ्चः कुतो न कुतोऽप्यसंभवीत्यर्थः । हन्तेत्युपदर्शने आश्चर्ये वा । माया च भविष्यति अर्थसहा च भविष्यति अर्थसहार्थक्रियासमर्थपदार्थोपदर्शनक्षमा । इति चेत् तत्किं भवत्परेषां माता च वन्ध्या सम्भाव्यते । किमिति संभावने अव्ययं । भवतो ये परे प्रतिपक्षास्तेषां भवद्व्यतिरिक्त पृथक्भूतत्वेन वादिनां माता चेत्कथं वन्ध्या वन्ध्याचेत्कथं माता इति स्पष्ट एव स्ववचनविरोधः इत्यर्थः॥ १३ ॥

अथ स्वाभिमतसामान्यविशेषोभयात्मकवाच्यवाचकभावसमर्थनपुरस्सरं तीर्थान्तरीयप्रकल्पिततदेकान्तगोचरवाच्यवाचकभावनिरासद्वारेण तेषां प्रतिभाविभवाऽभावमाह—

अनेकमेकात्मकमेव वाच्यं-
द्वयात्मकं वाचकमप्यवश्यम् ॥
अतोऽन्यथा वाचकवाच्यक्लृता-
वतावकानां प्रतिभाप्रमादः ॥ १४॥

व्याख्या—अनेकमिति,, वाच्यमभिधेयं चेतनमचेतनं वस्तु सामान्यरूपतया एकात्मकमपि व्यक्तिभेदेनाऽनेकमनेकरूपं । तथा वाचकमभिधायकं शब्दरूपं तदप्यवश्यं निश्चितं द्वयात्मकं सामान्यविशेषात्मकत्वादनेकात्मकमित्यर्थः । अत उपदर्शितप्रकारादन्यथा

सामान्यविशेषैकान्तरूपेण प्रकारेण वाचकवाच्यक्लृप्तौ वाच्यवाचकभावकल्पनायामतावकानामत्वदीयानामन्ययूथ्यानां प्रतिभाप्रमादः प्रज्ञास्खलितमित्यक्षरार्थः ॥ १४ ॥

इदानीं सांख्याभिमतप्रकृतिपुरुषादितत्त्वानां विरोधावरुद्धत्वं ख्यापयन् तद्बालिशताविलसितानामपरिमितत्वं दर्शयति—

चिदर्थशून्या च जडा च बुद्धिः,
शब्दादितन्मात्रजमम्बरादि ॥
न बन्धमोक्षौ पुरुषस्य चेति,
कियज्जडैर्न ग्रथितं विरोधि ॥ १५ ॥

व्याख्या—चिदिति, चित् चैतन्यशक्तिरात्मस्वरूपभूता, अर्थशून्या—विषयपरिच्छेदविरहिता, १ बुद्धिर्महत्तत्त्वाख्या जडा—अनवबोधस्वरूपा, २ अम्बरादि—व्योमप्रभृति भूतपञ्चकं शब्दादितन्मात्रजं, ३ पुरुषस्य च प्रकृतिविकृत्यनात्मकस्यात्मनो न बन्धमोक्षौ, किन्तु प्रकृतिरेवेति चतुर्थो इति शब्दः प्रकाराथः। एवं प्रकारमन्यदपि विरुद्धं जडै-मूर्खैस्तत्त्वावबोधविधुरधीभिः कापिलैः कियन्न ग्रथितं-स्वशास्त्रेषूपनिबद्धं। अपि त्वनंतचिद्शक्तिरर्थशून्या चेति,

(न)तदाचिच्छक्तिरेव न स्यात् घटवत् । नहि जडस्वरूपायां बुद्धौ विषयाऽध्यवसायः व्योम्नः सर्ववादिभिर्नित्यत्वमंगीक्रियते । अयं च शब्दतन्मात्रात् । न च परिणामिकारणं स्वकार्यस्य गुणो भवितुमर्हतीति शब्दगुणमाकाशमित्यादि वाङ्मात्रं । वागादीनां चेन्द्रियत्वमेव न युज्यते, इतरासाध्यकार्यकारित्वाभावात् । न बन्धमोक्षौ पुरुषस्येति,, तन्न, अनादिभवपरम्परानुबद्धया प्रकृत्या सह यः पुरुषस्य विवेको ग्रहणलक्षणोऽविष्वग्भावः स एव बन्धः, य एव बद्धः स एव मुच्यते इति पुरुषबन्धमोक्षौ ॥ १५ ॥

इदानीं ये प्रमाणादेकान्तेनाभिन्नं प्रमाणफलमाहु र्ये च बाह्यार्थप्रतिक्षेपेण ज्ञानाद्वैतमेवास्तीति ब्रुवते तन्मतस्य विचार्यमाणत्वे विशरारुतामाहुः —

न तुल्यकालः फलहेतुभावो,
हेतौ विलीने न फलस्य भावः ॥
न संविदद्वैतपथेऽर्थसंवि-
द्विलूनशीर्णं सुगतेन्द्रजालम् ॥ १६ ॥

व्याख्या—नेति,, फलं कार्यं हेतुः कारणं । तयोर्भावः स्वरूपं कार्यकारणभावः । स न तुल्यकालः समानकालो युज्यते इत्यर्थः । हेतौ कारणे प्रमाणलक्षणे

विलीने विनष्टे फलस्य प्रमाणकार्यस्य न भावः न सत्ता निर्मूलत्वात् सम्यगवैपरीत्येन विद्यते अवगम्यते वस्तुस्वरूपमनयेति संवित् ज्ञानं।तस्या अद्वैतं। द्वयोर्भावो द्विता। द्वितैव तंप्रज्ञादित्वात् स्वार्थकेऽणि। न द्वैतमद्वैतं संविदद्वैतं ज्ञानं तात्विकं। तस्य पन्था मार्गः संविदद्वैतपथस्तस्मिन् ज्ञानाद्वैतवादपक्षे इति यावत्।किमित्याह तत्रार्थसंविन्न घटते एवं स्थिते सति किमित्याह–विलूनेति,, सुगतो मायापुत्रस्तस्य सम्बन्धि तेन परिकल्पितं क्षणक्षयादि वस्तुजातं मतिव्यामोहविधातृत्वात् । सुगतेन्द्रजालं तत्सर्वं विलूनं विशीर्णं पूर्वं विलूनं पश्चात् शीर्णं ॥ १६ ॥

अथ तत्त्वव्यवस्थापकप्रमाणादिचतुष्टयव्यवहारापलापिनः शून्यवादिनः सौगतजातीयास्तत्कक्षीकृतपक्षसाधकस्य प्रमाणस्याङ्गीकाराऽनङ्गीकारलक्षणपक्षद्वयेऽपि तदभिमतार्थाऽसिद्धिप्रदर्शनपूर्वकमुपहसन्नाह—

विना प्रमाणं परवन्न शून्यः
स्वपक्षसिद्धेः पदमश्नुवीत ॥
कुप्येत्कृतान्तः स्पृशते प्रमाण-
महो सुदृष्टं त्वदसूयिदृष्टम् ॥ १७ ॥

व्याख्या--विनेति,, शून्यः शून्यवादी प्रमाणं प्रत्यक्षादिकं विना स्वपक्षसिद्धेः स्वाभ्युपगतशून्यवादनिष्प-

त्तेः पदं प्रतिष्ठां नाश्नुवीत न प्राप्नुयात्। किंवत्। परवत् इतरप्रामाणिकवत्। वैधर्म्येणायं दृष्टान्तः। यथा परे प्रामाणिकाः प्रमाणेन साधकतमेन स्वपक्षसिद्धिमश्नुवते एवं नायं, अस्य मते प्रमाणप्रमेयादिव्यवहारस्याऽपारमार्थिकत्वात्। कुप्येदिति,, प्रमाणं प्रत्यक्षाद्यन्यतमत्स्पृशते आश्रयमाणाय प्रकरणादस्मै शून्यवादिने कृतान्तः तत्सिद्धान्तः कुप्येत् कोपं कुर्यात्। सिद्धान्तबाधः स्यादित्यर्थः। अहो इत्युपहासप्रशंसायां। तुभ्यमसूयन्ति गुणेषु दोषानाविष्कुर्वंति इत्येवं शीलास्त्वदसूयिमस्तन्त्रान्तरीयास्तैर्दृष्टमत्यज्ञानचक्षुषा निरीक्षितं, अहो सुदृष्टं विपरीतलक्षणयोपहासाच्च सम्यग्दृष्टमित्यर्थः॥ १७॥

अधुना क्षणिकवादिन ऐहिकाऽमुष्मिकव्यवहाराऽनुपपन्नार्थसमर्थनमविमृश्यकारित्वं दर्शयन्नाह—

कृतप्रणाशाऽकृतकर्मभोग-
भवप्रमोक्षस्मृतिभङ्गदोषान्॥
उपेक्ष्य साक्षात् क्षणभङ्गमिच्छ-
न्नहो महासाहसिकः परस्ते॥ १८॥

व्याख्या—कृतेति,, कृतप्रणाशदोषमकृतकर्मभोगदोषं भवभङ्गदोषं प्रमोक्षभङ्गदोषं स्मृतिभङ्गदोषमि-

त्येतान् दोषान् साक्षादनुभवसिद्धान् उपेक्षानादृत्य साक्षात्कुर्वन्नपि गजनिमीलिकामवलम्बमानः सर्वभावानां क्षणभङ्गमुदयानन्तरविनाशरूपक्षणक्षयितामिच्छन् प्रतिपद्यमानस्ते तव परः प्रतिपक्षी वैनाशिकः सौगत इत्यर्थः । सहसा अविमर्शात्मकेन बलेन वर्तते-साहसिकः । भाविनमनर्थमविभाव्य यः प्रवर्तते स एवमुच्यते । महांश्चासौ साहसिकश्च महासाहसिकः अत्यन्तमविमृश्य प्रवृत्तिकारीत्यर्थः ॥ १८ ॥

अथ तथागताः क्षणक्षयपक्षे सव्यवहारानुपपत्तिं परैरुद्भावितामाकर्ण्येत्थं प्रतिपादयिष्यन्ति यत्पदार्थानां क्षणिकत्वेऽपि वासनाबललब्धजन्मना पेक्षयाध्यवसायेन ऐहिकामुष्मिकव्यवहारप्रवृत्तेः कृतप्रणाशादिदोषाः निरवकाशा एवेति, तदाकूतं परिहर्तुकामस्तत्कल्पितवासनायाः क्षणपरम्परातो भेदाभेदानुभयलक्षणे पक्षत्रयेऽप्यघटमानत्वं दर्शयन् स्वाभिप्रेतभेदाभेदस्याद्वादमकामानपि तानङ्गीकारयितुमाह—

सा वासना सा क्षणसन्ततिश्च,
नाऽभेदभेदाऽनुभयैर्घटेते ॥
ततस्तटाऽदर्शिशकुन्तपोत-
न्यायात्त्वदुक्तानि परे श्रयन्तु ॥ १९ ॥

व्याख्या—सेति,,सा शाक्य परिकल्पिता क्षणानामन्योन्यानुस्यूतप्रत्ययजनिका वासना पूर्वज्ञानजनिता-

मुत्तरज्ञाने शक्तिमाहुः । सा च क्षणसन्ततिस्वदर्शनप्रसिद्धा प्रदीपकलिकावन्नवनवोत्पद्यमाना क्षणपरम्परा । एते द्वेऽपि अभेदभेदाऽनुभयैर्न घटेते । न तावदभेदेन तादात्म्येन ते घटेते तयोर्हि अभेदे वासना वा स्यात् क्षणपरम्परा वा, न द्वयम् । यद्धि यस्मादभिन्नं न तत्ततः पृथगुपलभ्यते । यथा घटात् घटस्वरूपम् । न च भेदेन ते युज्येते । सा वासना क्षणिका चेत्तर्हि क्षणेभ्यस्तस्याः पृथक्कल्पनं व्यर्थम् ।अक्षणिका चेत्तथा पदार्थान्तराणां क्षणिकत्वकल्पनाप्रयासो व्यसनमात्रम् । अनुभयपक्षेणापि न घटेते । उत्तरार्धमाह त त इति,त्वदुक्तानि भवद्वचनानि भेदाभेदस्याद्वादसंवादपूतानि परे कुतीर्थ्याः सौगताः श्रयन्तु आद्रियन्ताम् । अत्रोपमानमाह—तटादर्शीत्यादि,, तटं न पश्यतीति तटादर्शी यः शकुन्तपोतः पक्षिशावकस्तस्य न्याय उदाहरणं । यथा शकुनिशावकः समुद्रान्तः पतितस्तटप्राप्तये मुग्धतयोड्डीनः अब्धिमवलोकयंस्तटमदृष्टवैव तदेव तटस्थानमाश्रयते गत्यन्तराभावात् । एवं कुतीर्थ्यास्तदुक्तं भेदाभेदपक्षमनिच्छयापि कक्षीकुर्वाणास्त्वच्छासनमेव प्रतिपद्यन्ताम् ॥ १९ ॥

साम्प्रतमक्रियावादिनां लौकायतिकानां मतं सर्वाधमत्वादन्ते उपन्यस्यन् तन्मतमूल्यस्य प्रत्यक्षप्रमाणस्यानुमानादिप्रमाणान्तरानङ्गीकारेऽकिञ्चित्करत्वप्रदर्शनेन तेषां प्रज्ञायाः प्रमादमादर्शयति—

विनाऽनुमानेन पराभिसन्धि-
मसंविदानस्य तु नास्तिकस्य ॥
न साम्प्रतं वक्तुमपि क्व चेष्ट-
क्व दृष्टमात्रं च हहा प्रमादः ॥ २० ॥

व्याख्या—विनेति,, प्रत्यक्षमेवैकं प्रमाणमिति मन्यते चार्वाकः। अनुमानेन लैङ्गिकप्रमाणेन विना पराभिसन्धिं पराभिप्रायमसंविदानस्य न सम्यक् जानानस्य नास्तिकस्य लोकायतिकस्य वक्तुमपि न साम्प्रतं वचनमप्युच्चारयितुं नोचितम्। ततस्तूष्णीभाव एवाऽस्य श्रेयान्। कथं क्वेति महदन्तरे। चेष्टा इङ्गितं अनुमेयस्य लिङ्गम्। क्व च दृष्टमात्रं प्रत्यक्षमात्रं। अ-तः हहा इति खेदे। अहो तस्य प्रमादः प्रमत्तता, यदनुभूयमानमप्यनुमानं प्रत्यक्षमात्राङ्गीकारेणापन्हुते ॥२०॥

अथानेकान्तवादं ये मन्यन्ते तेषामुन्मत्ततामाविर्भावयन्नाह—

प्रतिक्षणोत्पादविनाशयोगि-
स्थिरैकमध्यक्षमपीक्षमाणः ॥
जिन ! त्वदाज्ञामवमन्यते यः
स वातकी नाथ पिशाचकी वा ॥२१॥

व्याख्या— प्रतिक्षणं प्रतिसमयमुत्पादेनोत्तराकारस्वीकाररूपेण विनाशेन च पूर्वाकारपरिहारलक्षणेन युज्यते इत्येवं शीलं प्रतिक्षणोत्पादविनाशयोगि । किं तत् ? स्थिरैकं कर्मतापन्नम् । स्थिरमुत्पादविनाशयोरनुयायित्वात् त्रिकालवर्ति यदेकं वस्तु अध्यक्षमपीक्षमाणः प्रत्यक्षमवलोकयन्नपि हे जिन रागादिजैत्र ! त्वदाज्ञां भवत्प्रणीतस्याद्वादमुद्रां यः कश्चिदविवेकी अवमन्यतेऽवजानाति स पुरुषपशुर्वातकी पिशाचकी वा । वातो रोगविशेषोऽस्यास्तीति वातकी वातूल इत्यर्थः । पिशाचकी भूताविष्ट इत्यर्थः ॥ २१ ॥

अथ स्याद्वादव्यवस्थापनाय प्रयोगमप्रकारमुक्त्वा स्तुतिमाह—

अनन्तधर्मात्मकमेव तत्त्वं
मतोऽन्यथा सत्त्वमसूपपादम् ॥
इति प्रमाणान्यपि ते कुवादि-
कुरङ्गसन्त्रासनसिंहनादाः ॥ २२ ॥

व्याख्या—अनन्तेति,, तत्त्वं परमार्थभूतं वस्तु जीवाजीवलक्षणमनन्तधर्मात्मकमेव । अनन्तास्त्रिकालविषयत्वादपरिमिता ये धर्माः सहभाविनः क्रमभाविनश्च पर्यायास्त एवात्मा स्वरूपंयस्य तदनन्त ध-

मात्मकम् ।एवकारः प्रकारान्तरव्यवच्छेदार्थः। अत एवा-ह-" अतोऽन्यथा " उक्तप्रकारवैपरीत्येन सत्त्वं वस्तु तत्त्वमसूपपादम् । सुखेनोपपाद्यते इति सूपपादम् । न तथा असूपपादम् । दुर्घटमित्यर्थः । ते तव प्रमाणा-न्यपि न्यायोपपन्नसाधनवाक्यान्यपि । कुवादिनः कु-त्सितवादिन एकांशग्राहकनयाऽनुयायिनोऽन्यतीर्थि-कास्त एव संसारवनगहनवसनव्यसनितया कुरङ्गा-स्तेषां सम्यक्त्रासने सिंहनादा इव सिंहनादाः । य-था सिंहस्य नादमात्रमप्याकर्ण्य कुरङ्गास्त्रासमासूत्र-यन्ति तथा भवत्प्रणीतप्रमाणवाक्यान्यपि श्रुत्वा कु-वादिनस्त्रासमश्नुवते ॥ २२ ॥

अनन्तरमनन्तधर्मात्मकत्वं वस्तुनि साध्यं मुकुलित-मुक्तम् । तदेव सप्तभङ्गीप्ररूपणद्वारेण प्रपञ्चयन् भगवतो निरतिशयं वचनातिशयं च स्तुवन्नाह—

अपर्ययं वस्तु समस्यमान-
मद्रव्यमेतच्च विविच्यमानम् ॥
आदेशभेदोदितसप्तभङ्ग-
मदीदृशस्त्वं बुधरूपवेद्यम् ॥ २३ ॥

व्याख्या-अपर्ययमिति । समस्यमानं संक्षेपेणो-च्यमानं वस्त्वपर्ययमविवक्षितपर्यायम् । वसन्ति गु-

णाः पर्याया अस्मिन्निति वस्तु धर्माधर्माकाशपुद्गल-कालजीवलक्षणं षट् द्रव्यात्मकमपर्ययः सन् द्रव्यरूपमेव च । पुनरेतद्वस्तु विविच्यमानं विवेकेन पृथक्रूपतयोच्यमानमद्रव्यमेव । कथमित्याह—आदेशभेदेन सकलादेशविकलादेशलक्षणेन आदेशद्वयेन उदिताः सप्तसंख्या भङ्गा वचनप्रकारा यस्मिन् वस्तुनि तत्तथा। ननु भगवतैवमुक्तं तर्हि किमर्थं तीर्थान्तरीयास्तत्र विप्रतिपद्यन्ते, इत्याह—" बुधरूपवेद्यं " प्रकृष्टा बुधरूपा ज्ञानशालिनः प्राणिनः । तैरेव वेदितुं शक्यं वेद्यं । नान्यैर्मिथ्यादर्शनत्वात् ॥ २३ ॥

अथाबुधरूपाणां प्रमाणमार्गात् च्यवनमाह—

उपाधिभेदोपहितं विरुद्धं,
नार्थेष्वसत्त्वं सदवाच्यते च ॥
इत्यप्रबुद्ध्यैव विरोधभीता,
जडास्तदेकान्तहताः पतन्ति ॥ २४ ॥

व्याख्या—उपाधीति अर्थेषु पदार्थेषु चेतनाचेतनेष्वसत्त्वं नास्तित्वं न विरुद्धं । अस्तित्वेन सह विरोधं नाऽनुभवतीत्यर्थः । न केवलमसत्त्वं न विरुद्धं ( किं तु सदवाच्यते च ) अस्तित्वं नास्तित्वेन सह न विरुध्यते । अवक्तव्यत्वमपि नान्योऽन्यं विरुध्यते ।

हेतुमाह—उपाधयोऽवच्छेदका अंशप्रकारास्तेषां भेदो नानात्वं तेनोपहितमर्पितम् । असत्वस्य विशेषणमिदम् । उपाधिभेदोपवादिनस्तेषां सत्त्वादिधर्माणां य एकान्तस्तेन हता इव हताः पतन्ति स्खलन्ति ॥ २४ ॥

अथानेकान्तवादस्य सर्वद्रव्यपर्यायव्यापित्वेऽपि मूलभेदापेक्षया चातुर्विध्याभिधानद्वारेण भगवतस्तत्त्वामृतरसास्वादसौहित्यमुपवर्णयन्नाह—

स्यान्नाशि नित्यं सदृशं विरूपं,
वाच्यं न वाच्यं सदसत्तदेव ॥
विपश्चितां नाथ निपीततत्त्व-
सुधोद्गतोद्गारपरम्परेयम् ॥ २५ ॥

व्याख्या—स्यादित्यव्ययमनेकान्तद्योतकम् । तदष्टास्वपि योज्यम्। स्यात्कथंचिन्नाशि अनित्यशीलम् । स्य।न्नित्यमविनाशधर्मीत्यर्थः ।एतावता नित्यानित्यलक्षणमेकं विधानम्। स्यात्सदृशं सामान्यरूपम्। स्याद्विरूपं विविधरूपम् विसदृशरूपम् । अनेन सामान्यविशेषरूपो द्वितीयः प्रकारः । स्याद्वाच्यं वक्तव्यं ।स्यान्नवाच्यमवक्तव्यम् इत्यर्थः । एतेनाभिलाप्याऽनभिलाप्यस्वरूपस्तृतीयो भेदः। स्यात्सद् विद्यमानमस्तिरूपमित्यर्थः । स्यादसत्तद्विलक्षणमिति । अनेन सदसदाख्या

चतुर्थी विधा । हे विपश्चितां नाथ संख्यावतां मुख्य ! इयमनन्तरोक्ता निपीततत्त्वसुधोद्गतोद्गारपरम्परा तवेति प्रकरणाद् गम्यते । तत्त्वं स्वरूपं परिच्छेदस्तदेव जरामरणापहारित्वात्सुधा पीयूषं तत्त्वसुधा नितरां पीता आस्वादिता तस्या उद्गता प्रादुर्भूता उद्गारपरंपरा उद्गारश्रेणिरित्यर्थः ॥ २५ ॥ सप्तभङ्गी यथा स्यादस्ति १ स्यान्नास्ति २ स्यादस्ति स्यान्नास्ति ३ स्यादवक्तव्यम् ४ स्यादस्ति स्यादवक्तव्यम् ५ स्यान्नास्ति स्यादवक्तव्यम् ६ स्यादस्ति स्यान्नास्ति स्यादवक्तव्यम् इति सप्तमम् ॥ २५ ॥

इदानीं नित्याऽनित्यपक्षयोः परस्परदूषणप्रकाशनबद्धलक्षतया वैरायमाणयोरयत्नसिद्धप्रतिपक्षप्रतिक्षेपस्य भगवच्छासनसाम्राज्यस्य सर्वोत्कर्षमाह—

य एव दोषाः किल नित्यवादे,
बिनाशवादेऽपि समास्त एव ॥
परस्परध्वंसिषु कण्टकेषु,
जयत्यधृष्यं जिनशासनं ते ॥ २६ ॥

व्याख्या—य इति,' किलेति निश्चये । य एव नित्यवादे दोषा अनित्यैकान्तवादिभिः प्रसञ्जिताः क्रमयौगपद्याभ्यामर्थक्रियाऽनुपपत्त्यादयस्त एव बिनाशवा-

देऽपि क्षणिकैकान्तवादेऽपि नित्यैकान्तवादिभिः प्रसज्यमाना अन्यूनाधिकाः समास्तुल्याः । तथाहि-नित्यवादी प्रमाणयति । " सर्वं नित्यं सत्त्वात् । क्षणिके सदसत्कालयोरर्थक्रियाविरोधात् । अनित्यवादो वदति "सर्वं क्षणिकं सत्त्वात्" अक्षणिके क्रमयौगपद्याभ्यामर्थक्रिया विरोधादित्यादि, अर्थक्रियाकारित्वस्य च भावलक्षणत्वात् । परस्परेति कण्टकेषु क्षुद्रशत्रुषु एकान्तवादिषु परस्परध्वंसिषु सत्सु, हे जिन ते तव शासनं स्याद्वादप्ररूपणनिपुणं द्वादशाङ्गीरूपं प्रवचनं पराभिभावुकानां कण्टकानां स्वयमुच्छिन्नत्वेनैवभावाद्धृष्यमपराभवनीयं धर्षितुमशक्यमनर्हं वा जयति सर्वोत्कर्षेण वर्त्तते ॥ २६ ॥

नैकान्तवादे सुखदुःखभोगौ,
न पुण्यपापे न च बन्धमोक्षौ ॥
दुर्नीतिवादव्यसनानि नैव
परैर्विलुप्तं जगदप्यशेषम् ॥ २७ ॥

व्याख्या—नेति, एकान्तवादे नित्याऽनित्यैकान्तपक्षाभ्युपगमे न सुखदुःखभोगौ घटेते, न च पुण्यपापे घटेते, न च बन्धमोक्षौ घटेते । पुनः पुनः नञः प्रयोगोऽत्यन्ताऽघटमानतादर्शनार्थः । सुखदुःखभोगौ

पुण्यपाप निर्वृत्त्यौ । पुण्यं दानादि क्रियोपार्जनीयं शुभं कर्म । पापं हिंसादिक्रियासाध्यमशुभं कर्म बन्धः कर्मपुद्गलैः सह प्रतिप्रदेशमात्मनो वह्न्यःपिण्डवदन्योऽन्यसंश्लेषः मोक्षः कृत्स्नकर्मक्षयः । एवमनुपपद्यमानेऽपि सुखदुःखभोगादिव्यवहारे परैः परतीर्थिकैः परमार्थतः शत्रुभिः दुर्नीतिवादव्यसनासिना । दुष्टा नीतयो दुर्नीतयो दुर्नयाः । तेषां वादस्तत्र व्यसनमत्यासक्तिः दुर्नीतिवादव्यसनमेव सद्बोधशरीरच्छेदकत्वादसिः कृपाणस्तेन करणभूतेन दुर्नयप्ररूपणहेवाकखड्गेन । अशेषमपि जगन्निखिलमपि त्रैलोक्यं जगज्जन्तुजातं विलुप्तं, सम्यग्ज्ञानादिभावप्राणव्यपरोपणेन व्यापादितं । तत् त्रायस्वेत्याशयः ॥ २७॥

अथ दुर्नयस्वरूपं वर्णयन् भगवतो वचनातिशयं स्तुवन्नाह—

सदेव सत् स्यात्सदिति त्रिधाऽर्थो,
मीयेत दुर्नीतिनयप्रमाणैः ॥
यथार्थदर्शी तु नयप्रमाण-
पथेन दुर्नीतिपथं त्वमास्थः ॥ २८ ॥

व्याख्या—सदिति,, परिच्छिद्यते इत्यर्थः पदार्थ त्रिधा त्रिभिः प्रकारैर्मीयेत परिच्छिद्येत ।विधौ सप्त-

मी । कैस्त्रिभिः प्रकारैरित्याह--दुर्नीतिनयप्रमाणैः । नीयते एकदेशविशिष्टोऽर्थ आभिरिति नीतयो नयाः । दुष्टा नीतयो दुर्नयाः । नया नैगमाद्याः । प्रमीयते परिच्छिद्यते अर्थोऽनेकान्तविशिष्टोऽनेनेति प्रमाणं स्याद्वादात्मकं प्रत्यक्षपरोक्षलक्षणम्। तैः केनोल्लेखेन मीयेतेत्याह—सदेव सत्स्यात्सदिति । सदित्यव्यक्तत्वान्नपुंसकत्वम् । यथा किं तस्या गर्भे जातमिति । सदेवेति दुर्नयः । सदिति नयः स्यात्सदिति प्रमाणम् । इत्थं वस्तुस्वरूपमुक्त्वा स्तुतिमाह— यथार्थदर्शीत्यादि । दुर्नीतिपथं दुर्नयमार्गं । तुशब्दोऽत्रावधारणार्थः । त्वमेवास्थः त्वमेव निराकृतवान् । न तीर्थान्तरीयदैवतानि । केन कृत्वा ? नयप्रमाणपथेन। नयप्रमाणे उक्तस्वरूपे । तयोर्मार्गेण प्रचारेण । यतस्त्वं यथार्थदर्शी । यथार्थोऽस्ति तथैवपश्यतीत्येवंशीलो यथार्थदर्शी । विमलकेवलज्योतिषा यथावस्थितवस्तुदर्शी ।तीर्थान्तरशास्तारस्तु रागादिदोषकालुष्यकलङ्कितत्वेन तथाविधज्ञानाभावान्न यथार्थदर्शिनः। आस्थ इत्यस्यतेरद्यतन्यां" शास्त्यस्ति वक्तिख्यातेरङ्" इत्यङि "श्वयत्यस्तवचपतश्वास्थवोचपप्तम्" इति स्थादेशो "स्वरादेस्तासु" इति वृद्धौ रूपम् । अत्रैकत्र कृतसमासान्तः पथिन् शब्दोऽन्यत्राव्युत्पन्नः पथशब्दोऽदन्त इति पथशब्दस्य द्विः प्रयोगो न दुष्यति इति काव्यार्थः ॥ २८ ॥

इदानीं सप्तद्वीपसमुद्रमात्रो लोक इति वावदूकानां तन्मात्रलोके परिमितानामेव सत्त्वानां सम्भवात् परिमितात्मवादिनां दोषदर्शनमुखेन भगवत्प्रणीतं जीवाऽनन्त्यवादं निर्दोषतयाऽभिष्टुवन्नाह—

मुक्तोऽपि वाऽभ्येतु भवं भवो वा,

भवस्थशून्योऽस्तु मितात्मवादे ॥

षड्जीवकायं त्वमनन्तसंख्य-

माख्यस्तथा नाथ ? यथा न दोषः ॥२९॥

व्याख्या—मुक्त इति,, मितात्मवादे संख्यातानामात्मनामभ्युपगमे दूषणद्वयमुपतिष्ठते । तत्क्रमेण दर्शयति । मुक्तो निर्वृतिं प्राप्तः सोऽपि भवं संसारमभ्येतु अभ्यागच्छतु । इत्येको दोषः । भवो वा भवः संसारः । स वा भवस्थशून्यः । संसारिजीवैर्विरहितोऽस्तु भवत्विति द्वितीयो दोषः । एवं विभङ्गज्ञानिशिवराजर्षिमतानुसारिणो दूषयित्वोत्तरार्द्धेन भगवदुपज्ञमपरिमितात्मवादं निर्दोषतया स्तौति । षड्जीवेत्यादि । त्वं तु हे नाथ अनन्तसंख्यमनन्ताख्यसंख्याविशेषयुक्तं षड्जीवनिकायं । पृथिव्यप्तेजोवायु वनस्पतित्रसलक्षणम् । तथा तेन प्रकारेण आख्यः, मर्यादया प्ररूपितवान्, यथा येन प्रकारेण न दोषः, न दू-

षगमिति। जात्यपेक्षमेकवचनं। प्रागुक्तदोषद्वयजातीया अन्येऽपि दोषाः यथा न प्रादुष्यन्ति तथा त्वं जीवान· न्त्यमुपदिष्टवानित्यर्थः। आख्यः इति आङ्पूर्वस्य ख्यातेरङि सिद्धिः। पृथिव्यादीनां पुनर्जीवत्वमित्थं साधनीयम्। यथा सात्मिका विद्रुमशिलादिरूपा पृथिवी, छेदे समानधातूत्थानादर्शाऽङ्कुरवत्। भौममम्भोऽपि सात्मकं क्षतभूसजातीयस्य स्वभावस्य सम्भवात् शालूरवत्। आन्तरिक्षमपि सात्मकं, अभ्रादिविकारे स्वतः सम्भूय पातात् मत्स्यादिवत्। तेजोऽपि सात्मकमाहारोपादानेन वृद्ध्यादिविकारोपलम्भात् पुरुषाङ्गवत्। वायुरपि सात्मकः अपरप्रेरितत्वे तिर्यग्गतिमत्वाद् गोवत्। वनस्पतिरपि सात्मकः छेदादिभिर्म्लान्यादिदर्शनात् पुरुषाङ्गवत्। केषांचित् स्वापाङ्गनोपश्लेषादिविकाराच्च। अपकर्षवतश्चैतन्याद्वा सर्वेषां सात्मकत्वसिद्धिराप्तवचनाच्च। त्रसेषु च कृमिपिपीलिकाभ्रमरमनुष्यादिषु न केषांचित् सात्मकत्वे विगानमिति। काव्यार्थः॥ २९॥

अधुना परदर्शनानां परस्परविरुद्धार्थसमर्थकतया मत्सरित्वं प्रकाशयन् सर्वज्ञोपज्ञसिद्धान्तस्याऽन्योन्यानुगतसर्वनयमया मात्सर्याऽभावमाविर्भावयति।

अन्योऽन्यपक्षप्रतिपक्षभावाद्,

यथा परे मत्सरिणः प्रवादाः ॥
नया न शेषा न विशेषमिच्छन्,
न पक्षपाती समयस्तथा ते ॥ ३० ॥

व्याख्या—अन्योन्येति,, यथा येन प्रकारेण परे भवच्छासनादन्ये प्रवादा दर्शनानि मत्सरिणः, अतिशयेन क्रोधोकषायकलुषितान्तःकरणाः सन्तः प्रवर्तन्ते। कस्मात्। अन्येति। पक्षःस्वसाधनोपन्यासः, प्रतिपक्षः तद्विरोधी तस्य भावः प्रतिपक्षभावः अन्योन्यं परस्परं यः पक्षप्रतिपक्षभावस्तस्मात्। तथा तेन प्रकारेण ते तव समयः सिद्धान्तः न पक्षपाती नैकपक्षानुरागी। मत्सरित्वाऽभावमेव विशेषणद्वारेण समर्थयति। नयेति, अशेषान् समस्तान्नैगमादीन् अविशेषं निर्विशेषं यथास्यात्तथा इच्छन्नाकाङ्क्षन् सर्वनयात्मकत्वादनेकान्तवादस्येत्यर्थः ॥ ३०॥

इत्थंकारं कतिपयपदार्थविवेचनद्वारेण स्वामिनो यथार्थवादाख्यं गुणमभिष्टुत्य समग्रवचनातिशयव्यावर्णने स्वस्याऽसामर्थ्यं दृष्टान्तपूर्वकमुपदर्शयन्नौद्धत्यपरिहाराय भङ्ग्यन्तरतिरोहितं स्वाभिधानं च प्रकाशयन्निगमनमाह—

वाग्वैभवं ते निखिलं विवेक्तु-
माशास्महे चेन्महनीयमुख्य ?॥

लङ्घेम जङ्घालतया समुद्रं,

वहेम चंद्रद्युतिपानतृष्णाम् ॥ ३१ ॥

व्याख्या—वागिति,, हे महनीय मुख्य ! । महनीयाः पूज्याः पञ्च परमेष्ठिनः । तेषु मुख्यः प्रधानभूतः आद्यत्वात् । तस्य संबोधनम् । ते तव निखिलं कृत्स्नं वाग्वैभवं वचनसम्पत्प्रकर्षं विवेक्तुं विचारयितुं चेद्यदि वयमाशास्महे इच्छामः । ततः किमित्याह । तदा इत्यध्याहार्यम् । तदा जङ्घालतया जाङ्घिकतया वेगवत्तया समुद्रं लङ्घेमः किल । समुद्रमिवातिक्रमामः । तथा वहेम धारयेमः । चन्द्रद्युतीनां पानं । तत्र तृष्णा तर्षोऽभिलाषस्ताम् । इति काव्यार्थः ॥ ३१ ॥

अथ भगवतः संसारे निमज्जितस्य य जगतोऽभ्युद्धरणे सामर्थ्यं दर्शयंस्तदुपास्तिविन्यस्तमानसानां पुरुषाणामौचितीचतुरतां प्रतिपादयति—

इदं तत्त्वाऽतत्त्वव्यतिकरकरालेऽन्धतमसे,

जगन्मायाकारैरिव हतपरैर्हा विनिहितम् ॥

तदुद्धर्तुं शक्तो नियतमविसंवादिवचन-

स्त्वमेवातस्त्रातस्त्वयि कृतसपर्याः कृतधियः ।३२।

व्याख्या—इदमिति,, इदं प्रत्यक्षोपलभ्यमानं जग-

द्विश्वम् । उपचाराज्जगद्वर्त्ती जनः । हतपरैः ( हता अधमा ये परे तीर्थान्तरीया हतपरे तैः ) मायाकारैरिवैन्द्रजालिकैरिव ( शाम्बरीयप्रयोगनिपुणैरिवेति यावत् ) अन्धतमसे निबिडान्धकारे हा इति खेदे विनिहितं विशेषेण निहितं स्थापितं पातितमित्यर्थः । कथंभूतेऽन्धतमसे, तत्त्वाऽतत्त्वव्यतिकरकराले तत्त्वं चाऽतत्त्वं च तत्त्वाऽतत्त्वे । तयोर्व्यतिकरो व्यतिसंकीर्णता स्वभावविनिमयस्तत्त्वाऽतत्त्वव्यतिकरः । तेन कराले भयङ्करे । यत्रान्धतमसे तत्त्वेऽतत्त्वाभिनिवेशः, अतत्त्वे च तत्त्वाभिनिवेश इत्येवंरूपो व्यतिकरः सञ्जायत इत्यर्थः । तज्जगदुद्धर्तुंमोहमहान्धकारोपप्लवात् कर्तुं नियतं निश्चितं त्वमेव । नान्यः शक्तः समर्थः । किमर्थमित्थमेकस्यैव भगवतः सामर्थ्यमुपवर्ण्यते ! इति विशेषणद्वारेण कारणमाह–अविसंवादिवचनः, , न विसंवदतीत्येवंशीलमविसंवादि । तथाभूतं वचनमुपदेशो यस्याऽसावविसंवादिवचनः,, । अव्यभिचारिवागित्यर्थः । तीर्थान्तरीयाप्ता हि न प्रकृतपरोक्षात्त्रयविशुद्धवादिन इति ते महामोहान्धतमसे एव जगत्पातयितुं समर्थाः, न पुनस्तदुद्धर्तुम् । अतः कारणात् । कुमतध्वान्तार्णवान्तः पतितभुवमाऽभ्युद्धारणाऽसाधारण सामर्थ्य लक्षणात् । हे भ्रात

त्रिभुवनपरित्राणप्रवीण ! त्वयि ( काकवाऽवधारण-स्य गम्यमानत्वात् त्वय्येव विषये, न देवान्तरे ) कृत-धियः ( करोतिरत्र परिकर्म्मणि वर्त्तते । यथा हस्तौ कुरु पादौ कुरु इति । कृता परिकर्मिता तत्त्वोपदेशपेशलतत्तच्छास्त्राभ्यासप्रकर्षेण संस्कृता धीर्बुद्धिर्येषां ते कृतधियश्चिद्रूपाः ) पुरुषाः कृतसपर्याः । प्रादिकं विनाप्यादिकर्मणो गम्यमानत्वात् प्रकृताः कर्त्तमारब्धा सपर्या सेवाविधिर्यैस्ते कृतसपर्याः इति काव्यार्थ ॥ ३२ ।

बिभ्राणे किल निर्ज्जयाज्जिनतुलां
श्री हेमचन्द्रप्रभौ ।
तद्बन्धस्तुतिवृत्तिनिर्मितमिषा-
द्भक्तिर्मया विस्तृता ॥
निर्णेतुं गुणदूषणे निजगिरां
तन्नार्थये सज्जनान् ।
तस्यास्तत्त्वमकृत्रिमं बहुमतिः
सास्त्यत्र सम्यग् यतः ॥ १ ॥

सावचूरिकान्य योगव्यवच्छेदद्वा त्रिंशिका
सम्पूर्णा ॥